
# कर्मकाण्डसंस्कारविज्ञानम्




प्रधानसम्पादक:

प्रो. अर्कनाथचौधरी

सम्पादक:

डॉ. शत्रुघ्नपाणिग्राही

सहसम्पादक:

डॉ. अश्विन का. राजगोर:


Scanned with CamScanner

# गो-तत्त्वम्, तस्याः यागे योगदानम्, गोर्महत्वञ्च

डॉ. पङ्कजकुमार एस. रावल

***नमो ब्रह्मण्यदेवाय गोब्राह्मणहिताय च ।***

***जगहिताय कृष्णाय गोविन्दाय नमो नमः ॥ ( महाभारतम् )***

वेदादारभ्य स्मृतिपुराणं यावद् सर्वत्र गौः महिमा महत्वञ्च प्रतिपादितं विद्यते। भारतीयसनातनसंस्कृतेः नैकोऽपि ग्रन्थः तादृशः यत्र गौः माहात्म्यं न वर्णितं स्यात्, यदि कदाचित् तन्माहात्म्यं न लभ्यते किन्तु गौः भर्त्सना तु नैव कुत्रापि दृश्यते। संस्कृतिः संस्कृताश्रिता प्रोक्ता विद्यते। संस्कृतेः महत्वपूर्णाङ्गेषु गौः स्थानं मानं सन्माननं सर्वादौ आगच्छति। गोपूजा विषये तन्महत्त्वं प्रतिपादयितुं कस्यापि महापुरुषस्य येषां केषामपि संस्कृतग्रन्थानां शास्त्राणां मतभेदः नास्ति। निर्विवादितोऽयं विषयः तथा च मातृकल्पा इयं गौ भारतीयसनातनधर्मस्य धर्माधाररूपा विद्यते।

इदानीं समये काले धेनुः वैश्विक चर्चायाः विषयः जातः तथा च राजकीयविषयः जातः। ऋषिभिः मुनिभिः पूजिता सेविता धेनुः जनैत्यादरेण गृह्यते किन्तु न सेव्यते।

जगति अन्येषां जनानां शरणागतिः स्वीकरणाद्वरं गोः शरणम् अत्युत्तमम् अत एव धर्मशास्त्रे प्रोक्तं यथा–

***सर्वेषामेव भूतानां गावः शरणमुत्तमम् ।***

गोः माहत्म्यं महत्त्वं महिमा वा हिन्दुसंस्कृतौ एवास्ति।

***"यद् गृहे दुःखिता गावः स याति नरके नरः" ।***

पुराकाले धनवैभवः प्रधानभूतः नासीत् अपितु धनधान्यात् अपि धेनुवैभवः पशुवैभवः श्रेष्ठतम आसीत्। अत एव जनाः तदानीं मानसिकतया अत्यधिकं सुखिनः आसन् इदानीं यन्त्राणां यानानां वाहनानां माहात्म्यं प्राबल्यं वर्तते।

विप्राः आशीर्वादप्रदानावसरेऽपि वदन्ति –

***स्वस्त्यऽस्तु ते कुशलमस्तु चिरायुरस्तु गोवाजिरस्तु धनधान्यसमृद्धिरस्तु ।***

***ऐश्वर्यमस्तु बलमस्तु रिपोः क्षयोऽस्तु वंशे सदैव भवतां हरिभक्तिरस्तु ॥***

इत्थमाशीर्वादप्रदानावसरेऽपि गोवृद्धिर्ते गृहे भवतु।

पुरा काले गुरवोऽपि पाठनात्पूर्वं छात्रैः शिष्यैः स्वाश्रमे गो सेवां कारयन्ति स्म। शतात् सहस्त्रं गावः भवन्ति ततश्च पठनारम्भः समभवत्। इत्युपनिषदः कथा वर्तते।

राज्ञा दिलीपेनापि पुत्रप्राप्त्यै सन्ततिमवाप्त्यै धेनुसेवा कृता वर्त्तते।

अथर्ववेदे तु गो सूक्तमेवागच्छति।

***माता रुद्राणां दुहिता वसूनां स्वसाऽऽदित्यानाममृतस्य नाभिः ।***

***प्र नु वोचं चिकितुषे जनाय मा गामनागामदितिं वधिष्ट ॥***

***आ गावो अग्मन्नुत भद्रमक्रनसीदन्तु गोष्ठे रणयन्त्वस्मे ।***

***प्रजावतीः पुरुरूपा इह स्युरिन्द्रायपूर्वीरुषस्ते दुहाताः ॥***



Scanned with CamScanner

*न ता नशन्ति न दभाति तस्करो नासाममित्रो व्यथिरा दधर्षति ।*

*देवांश्च याभिर्यजते ददाति च ज्योगित्ताभिः स च ते गोपतिः सह ॥*

*गावो भगो गाव इन्द्रो म इच्छाद गावः सोमस्य प्रथमस्य भक्षः ।*

*इमा या गावः स जनास इन्द्र इच्छामि हृदा मनसा चिदिन्द्रम् ॥*

*यूयं गावो मेदयथा दृशं चिदश्रीरं चित् कृणुथा सुप्रतीकम् ।*

*भद्रं गृहं कृणुथ भद्रवाचो बृहद्वो वय उच्यते सभासु ॥*

*प्रजावतीः सूचवसे रुशन्तीः शुद्धाः अपः सुप्रयाणे पिबन्तीः ।*

*मा व स्तेन ईशत माघशंसः परि वो रुद्रस्य हेतिर्वृणक्तु ॥*

*( अथर्व - ४/२१ )*

इत्थं वेदैः माहात्म्यं वर्णितं किन्तु मानवेन तद्भावेन नाङ्गीकृतम् ।

समुद्रमथनस्य प्रसङ्गः शास्त्रे बहुधा प्रसिद्धः वर्तते । विविधेषु ग्रन्थेषु प्रसङ्गोऽयमागच्छति । अमृतपानाय देवैः दानवैस्सह समुद्रमन्थनं भगवदाज्ञया समारब्धं तस्मात् चतुर्दशरत्नानि निर्गतानि तत्तु सर्वविदितं किन्तु तेषु रत्नेषु रत्नतममेकं धेनुः न विस्मरणीया । मङ्गलाष्टके विप्रैः तेषां रत्नानां स्मरणं क्रियते । यथा –

*लक्ष्मीः कौस्तुभपारिजातकसुरा धन्वन्तरी चन्द्रमाः*

*"गावः कामदुघा" सुरेश्वरगजो रम्भादिदेवाङ्गना ।*

*अश्व सप्तमुखो सुधा हरिधनुः शङ्खो विषं चाम्बुधे-*

*र्रत्नानीति चतुर्दशप्रतिदिनं कुर्वन्तु वो मङ्गलम् ॥*

समुद्रमन्थनात् निर्गतानां सर्वरत्नानामाश्रयभूमिः भूमयो वा विविधाः वर्तन्ते किन्तु कामदुघा धेनुः कामधेनुः देवैः सा ऋषिभ्यो दत्ता । यज्ञसम्पादनाय अत एव वसिष्ठऋषिणा निजाश्रमे सा स्थापिता किन्तु न स्वार्थाय अपि तु परार्थाय यज्ञाय तथा च न दुग्धपानाय अपि तु तया यज्ञसम्पादनं कृतं विश्वकल्याणाय सेविता यया जगत्पोषितम् । धेन्वाः गौर्चतुष्टयं भवति यैः सा दुग्धं मुञ्चति किन्तु वेदविदः कथयन्ति तेषु गोर्चतुष्टयेषु द्वयोः दुग्धं स्ववत्सेभ्यो द्वयोश्च मानवेभ्यः प्रयोगः भवति । किन्तु अद्य मानवः गोः दुग्धं प्राप्नोति किन्तु गोवत्सेभ्यो तस्याधिकारानुगुणं न ददाति सर्वं पयः स्वार्थाय विक्रयणाय स्वीकरोति । ***'गावो विश्वस्य मातरः'*** प्रसिद्धं वचनं शिवः अजन्मा विद्यते अतः एव ***महिम्नस्तोत्रे पुष्पदन्तः कथयति-***

***अजन्मानो लोकाः किमवयववन्तोऽपि जगतामिति . . . . . . .***

मातुरुदरात् यो जीवावतरति स तु मातुः स्तन्यं प्राप्नोति किन्तु शिवः मातृगर्भात् नागतः तथापि मातृवात्सल्यं मातृस्नेहं मातु स्तन्यं प्राप्नुयात् तदर्थं शिवः समये समये दुग्धं पिबति । भक्ताः दुग्धाभिषेकं कुर्वन्ति शिवे, कारणं या धेनुः विश्वस्य माता सा शिवस्यापि विश्वसंहारकस्यापि भवति अतः शिवभक्ताः गोदुग्धेन शिवमभिसिञ्चन्ति । मातापुत्रयोः वात्सल्यपूर्णं मेलनं तदस्ति । दुग्धेन शिवाभिषेकस्य अनन्यकारणेषु इदमप्येकं विशिष्टं कारणं विद्यते ।

विविधप्रकारान् यज्ञान् सम्पादयितुं धेनुः परमावश्यका विद्यते इति गीता कयथति –

***सहयज्ञाः प्रजाः सृष्ट्वा पुरोवाच प्रजापतिः ।***

***अनेन प्रसविष्यध्वमेष वोऽस्त्विष्टकामधुक् ॥***



Scanned with CamScanner

( गीता – ३/१० )

यज्ञे पञ्चगव्यस्य परमावश्यकता भवति। तेन पञ्चगव्येन देहशुद्धिर्भवति।

*यत् त्वगस्थिगतं पापं देहे तिष्ठति मामके।*

*प्राशनं पञ्चगव्यस्य दहत्यग्निरिवेन्धनम् ॥*

हिन्दीभाषायाः सुप्रसिद्धकविनाश्रीमैथिलीशरणगुप्तमहोदयेनापि गो–गीता विलिखिता विद्यते।

*गाय कहूं वा तुझको माय ?*

*अयि आबाल वृद्ध हम सब की जीवन भरकी धाय* धेनुः ऐहिकामुष्मिककल्याणस्य साधनभूता विद्यते। *( श्रीमैथिलीशरणगुप्त )*

*गावः प्रतिष्ठा भूतानां गावः स्वस्त्ययनं महत्।*

*गावो भूतं च भव्यं च गावः पुष्टिः सनातनी ॥*

भारतवर्षस्य एकं नाम पुण्यभूमिरपि वर्तते। भारतदेशाद्बहिरपि गो सेवा भवति।

विश्वामित्रवसिष्ठयोः एका दीर्घा कथा वर्तते कामधेनुविषये। विश्वामित्रः वसिष्ठात् तां धेनुं वाञ्छति ऋषिः वसिष्ठः कथयति यदि सा जिगमिषति चेत् गृह्यताम् तदा सा कामधेनुः वसिष्ठ ऋषेराश्रमात् गन्तुं नेच्छति तदा विश्वामित्रः तद् दृश्यं दृष्ट्वा कथयति –

*धिग्बलं क्षत्रियबलं ब्रह्मतेजो बलं बलम्।*

*एकेन ब्रह्मदण्डेन सर्वास्त्राणि हतानि मे ॥*

( वाल्मीकिरामायणम् )

तदा विश्वामित्रः धेनोरपि वसिष्ठभक्तिं ज्ञात्वा चानुभूय आश्चर्यचकितोऽभवत्।

वसिष्ठः वदति च –

*गावो मामुपतिष्ठन्तु हेमश्रृङ्ग्यः पयोमुचः।*

*सुरभ्यः सौरभेय्यश्च सरितः सागरं तथा ॥*

*गा वै पश्याम्यहं नित्यं गावः पश्यन्तु मां सदा।*

*गावोऽस्माकं वयं तासां यतो गावस्ततो वयम् ॥*

( वाल्मीकिरामायणम् )

पृथ्वी स्थिरा वर्तते भवगता स्वस्थभावेन धृता वर्तते तत्रापि सप्तकारणानि सन्ति–

*गोभिर्विप्रैश्च वेदैश्च सतीभिः सत्यवादिभिः।*

*अलुब्धैर्दानशौण्डेश्च सप्तभिर्धार्यते मही ॥*

यज्ञसामग्र्यः प्रायः गवा लभ्यते तत्र परमावश्यकं पञ्चगव्यम् –

*गोमूत्रं गोमयं क्षीरं दधि सर्पी कुशोदकम्।*



Scanned with CamScanner

भगवता श्रीरामेण स्वजीवने यज्ञरक्षार्थे ऋषिविश्वामित्रेण सह गमनं कृतमासीत् किन्तु यावती गोसेवा कर्तव्या आसीत् तावती न कृता अत एव द्वितीयावतारे श्रीकृष्णजन्मनि गोसेवा प्रचूरतया कृता रामजन्मनः प्रायश्चित्तं च कृतम् श्रीकृष्णेन च प्रोक्तम्।

*गावो ममाग्रतः नित्यं गावः पृष्ठत एव च।*

*गावश्च सर्वगात्रेषु गवां मध्ये वसाम्यहम् ॥*

*(पद्मपुराणम्)*

वाल्मीकीयरामायणे रामेण दशसहस्रकोटिपरिमिताः गोः दाने प्रदत्ता तदस्ति किन्तु स्वयं रामेण सेवा कृता तन्नास्ति।

"गवां कोट्ययुतं दत्त्वा।" *(वाल्मीकीरामायण - १/१/९५)*

श्रीकृष्णेन यथा गोसेवा कृता तेनैव सः गोपालः गोविन्देति नामाभिधानो जातः। श्रीकृष्णेन कल्पितं चिन्तितं विचारितं यत् -

*गावस्तुष्टाः प्रयच्छन्ति वरानपि सुदर्लभान्।*

*गावो लक्ष्याः सदा मूलं गोषु दत्तं न नश्यति ॥*

श्रीमद्भागवतमहापुराणे चतुर्थे स्कन्धे तत्र भवता नारायणांशनेनादि राज्ञा पृथुनापि गोदोहनेन पृथिव्याः रक्षणं कृतं तथा शताश्वमेधैः स्वराज्यशासनं चालितम्। कथनस्याशयः वर्तते वृक्षारोपणम्, यज्ञ-यजन-याजनम् तथा गोसेवा आदि उपायैरेव विश्वकल्याणं भविष्यति इति मम दृढा मतिः वर्तते।

महाभारतेऽपि गोमहिमा यज्ञायैव प्रतिपादितः वर्तते। ग्रन्थाधारेण यथा -

*यज्ञाङ्गं कथिता गावो यज्ञ एव च भासवः।*

*एताभिश्च विना यज्ञो न वर्तते कथंचन ॥*

*धारयन्ति प्रजाश्चैव पयसा हविषा तथा।*

*एतासां तनयाश्चापि कृषियोगमुपासते ॥*

*जनयन्ति च धान्यानि बीजानि विविधानि च।*

*ततो यज्ञाः प्रवर्तन्ते हव्यं कव्यं च सर्वशः ॥*

*पयो दधि घृत चैव पुण्याश्चैताः सुराधिप।*

*वहन्ति विविधान् भारान् क्षुत्तृष्णापरिपीडिताः ॥*

*मुनीश्च धारयन्तीह प्रजाश्चैवापि कर्मणा।*

*वासवाकूटवाहन्यः कर्मणा सुकृतेन च ॥*

भारतदेशे गावः महत्वं यज्ञाय च तस्याः उपादेयता कथनीया भवेत् तद् योग्यं न स्यात्। अनेन देशेन सर्वेषु युगेषु गावः महत्वं वर्धितमेवास्ति।

*गच्छतीति गौः वा गतिशीला वर्तते प्रगतिम्-*

*ऊर्ध्वगतिं च वा साधयति प्रापयति सा गौः।*

*गौरिति पृथिव्या नामधेयं यदस्यां भूतानि गच्छन्ति।(निरुक्तम् -२/१/१)*

गो शब्दस्य धेनुः पृथ्वीन्द्रियाणीति त्रयोऽर्थाः भवन्ति।

अस्माकं शास्त्रेषु दश महादानानि प्रोक्तानि सन्ति। तेषु गोदानं श्रेष्ठतमं विद्यते। तानि यथा –

*महीदानञ्च "गोदानं" हैमवस्त्रतिलाजलम्।*

*धान्यदीपान्नदानञ्च महादानानि दानसु॥* (दानमीमांसा)

विविधानां रोगाणां प्रशमनायापि गोदुग्धं श्रेयस्करं वर्तते।

*गवां सितानां वातघ्नं कृष्णानां पित्तनाशनम्।*

*श्लेष्मघ्नं रक्तवर्णानां त्रीन्हन्तिकपिलापयः॥*

प्रतिदिनं १० निमेषं यावत् गोषु हस्तप्रसारणं स्पर्शो वा क्रियते चेत् 'ब्लडप्रेशरः' नामो रोगः नियन्त्रितः भवति।

अन्ते प्रार्थनया यथा –

*स्वस्ति प्रजाभ्यः परिपालयन्तां न्याय्येन मार्गेण महीं महीशाः।*

*गो ब्राह्मणेभ्यः शुभमस्तु नित्यं लोकाः समस्ताः सुखिनो भवन्तु॥*

*गङ्गा न तोयं पशवो न गावः तिला न धान्यं तुलसी न वृक्षः।*

*तृणं न दर्भो कनकं न धातुः विप्राः नरेन्द्राः न हि ते मनुष्याः॥*

*आदौ माता गुरोः पत्नी ब्राह्मणी राजकन्यका।*

*धेनुर्धात्री तथा पृथ्वी सप्तैताः मातरः स्मृताः॥*


*सन्दर्भग्रन्थाः*

(१) महाभारतम्
(२) श्रीमद्भगवद्गीता।
(३) निरुक्तम्।
(४) पद्मपुराणम्।
(५) अथर्ववेदः।
(६) ब्रह्मनित्यकर्मसमुच्चयः।
(७) श्रीमद्भागवतमहापुराणम्।
(८) शिवमहिम्नस्तोत्रम्।
(९) मैथिलीशरणगुप्तः।
(१०) वाल्मीकीयरामायणम्।
(११) आह्निकसूत्रालिः।
(१२) शब्दकल्पद्रुमः।
(१३) दानमीमांसा।



आसी.प्रोफेसर, संस्कृत कालेज

श्रीसोमनाथसंस्कृतविश्वविद्यालय,वेरावलम्





Scanned with CamScanner